'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours Part-III Examination, 2022

## SANSKRIT

## PAPER-VIII

## NEW SYLLABUS

Time Allotted: 4 Hours Full Marks: 100

*The figures in the margin indicate full marks.*

### UNIT-I

1. अधोलिखितेषु सूत्रेषु द्वयोः व्याख्या कार्या – 4×2 = 8

(क) तथायुक्तं चानीप्सितम्।

(ख) कर्मणा यमभिप्रैति स सम्प्रदानम्।

(ग) अपवर्गे तृतीया।

(घ) साधकतमं करणम्।

2. अधोलिखितेषु दीक्षितवचनेषु द्वयोः व्याख्या कार्या – 4×2 = 8

(क) तमब्ग्रहणं किम् – ''पयसा ओदनं भुङ्क्ते''।

(ख) परिमाणमात्रे द्रोणो व्रीहिः।

(ग) प्रकर्षविवक्षायां तु परत्वात् कर्मसंज्ञा, पुष्पाणि स्पृहयति।

(घ) अर्थनिबन्धनेयं संज्ञा, बलिं भिक्षते वसुधाम्।

3. काचिदेका व्याख्या कार्या – 4

(क) क्रियाया द्योतको नायं संबन्धस्य न वाचकः।
नापि क्रियापदाक्षेपी संबन्धस्य तु भेदकः॥

(ख) अपादान-सम्प्रदान-करणाधार-कर्मणाम्।
कर्तुश्चान्योन्यसन्देहे परमेव प्रवर्तते॥

4. रेखाङ्कितानां पदानां ससूत्रं सकारणं विभक्तिनिर्णयं कुरुत (त्रयाणाम्)– 2×3 = 6

(क) मल्लो मल्लाय अलम्।

(ख) जपमनु प्रावर्षत्।

(ग) पान्थः तरुमूलम् अधिशेते।

(घ) बलिं याचते वसुधाम्।

(ङ) पुष्पेभ्यः स्पृहयति।

5. एकस्य टिप्पणी कार्या – 4

(क) प्रातिपदिकार्थः, (ख) आधारः, (ग) उपपदविभक्तिः।

## UNIT-II

6. अधोलिखितेषु सूत्रेषु त्रयाणां व्याख्या कार्या – $5\times3 = 15$

(क) विशेषणं विशेष्येण बहुलम्।

(ख) पञ्चमी भयेन।

(ग) उपपदमतिङ्।

(घ) संख्या वंश्येन।

(ङ) तृतीया तत्कृतार्थेन गुणवचनेन।

7. टिप्पणी कार्या (द्वयोः) – $4\frac{1}{2}\times2 = 9$

(क) उपसर्जनम्, (ख) उपमानकर्मधारयः, (ग) विग्रहः, (घ) गति-समासः।

8. ससूत्रं पदसाधनं कुरुत (त्रयाणाम्) – $2\times3 = 6$

सुमद्रम्, किंराजा, यथाविधि, सप्तगङ्गम्, अष्टाध्यायी, उपगिरम्।

## UNIT-III

9. प्रश्नद्वयं समाधेयम्– $15\times2 = 30$

(क) वैदिक-लौकिकसंस्कृतयोः वैसादृश्यं सम्यग् आलोचयत।

(ख) को नाम ध्वनिनियमः ? ग्रासमानध्वनिनियमः सविशदमालोच्यताम्।

(ग) इन्दो-इउरोपीयभाषायाः प्राथमिकाः भागाः कति ? तेषां नामानि लिखत। तेषु भागेषु काः का भाषाः सन्ति ? यथेच्छस्य एकस्य वैशिष्ट्यमालोचयत।

(घ) टिप्पणी कार्या – (त्रयाणाम्) $5\times3 = 15$

(i) अपिनिहितिः

(ii) समीभवनम्

(iii) वर्णविपर्ययः

(iv) अपश्रुतिः

(v) समाक्षरलोपः।

## UNIT-IV

10. संस्कृतभाषया देवनागरीलिप्या च कमप्येकम् आधारीकृत्य निबन्धमेकं लिखत – 10

(क) जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

(ख) छात्राणां राजनीतिचर्चायाः प्रासङ्गिकता।

(ग) वर्तमाने युगे संस्कृतभाषायाः गुरुत्वम्।

(घ) ईश्वरचन्द्रविद्यासागरस्य संस्कृतं प्रति अवदानम्।

——×——